सम्भाव्यमानसम्बन्धस्यागामिनो दुरितस्यानभिसम्बन्धं विदुषो व्यपदिशति श्रुतौ "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म्म न श्लिष्यत" इति । तथा विनाशमपि पूर्ब्बोपचितस्य दुरितस्य व्यपदिशति 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त" इति । अयमपरः कर्मक्षयव्यपदेशो भवति । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इति । यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकदर्थनं स्यादिति । नैष दोषः न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः । शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियेत न प्रतिबन्धाभावेऽपि । "न हि कर्म क्षीयत" इत्येतदपि स्मरणमौत्सर्गिकं न भोगादृते कर्म क्षीयते तदर्थत्वादिति इष्यत एव प्रायश्चित्तादिना तस्य क्षयः । "सर्वं पाप्मानन्तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिश्रुतिस्मृतिभ्यः । यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि क्षपयिष्यन्तीति तदसत् दोषसंयोगेन नोद्यमानानामेषां दोषनिष्कृतिफलान्तरकल्पनानुपपत्तेः । यत् पुनरुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीत्यत्र ब्रूमः । सगुणासु तावद्विद्यासु विद्यत एव विधानं तासु च वाक्यशेषे ऐश्वर्य्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते । तत्राविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्य्यप्राप्तिस्तासां फलमिति निश्चीयते । निर्गुणायान्तु विद्यायां यद्यपि विधानं नास्ति तथाप्यकर्त्रात्मबोधात् कर्मप्रदाहसिद्धिः । अश्लेष इति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति । अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिपेद इव तथापि विद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रलीयन्त इत्याह विनाश इति । पूर्वप्रसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्त्ता भोक्ता वाहमासं नेदानीं" नापि भविष्यति काल इति ब्रह्मविदवगच्छति । एवमेव च मोक्ष उपपद्यते अन्यथा ह्यनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात् । न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भवितुमर्हति अनित्यत्वप्रसङ्गात् परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य । तस्माद्ब्रह्माधिगमे दुरितक्षय इति स्थितम् ॥

"इतरस्याप्येवमसंश्लेषः पाते तु" शा० सू० ॥ "पूर्वस्मिन्नधिकरणे बन्धहेतोरघस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ धर्मस्य पुनः शास्त्रीयत्वाच्छास्त्रीयेण ज्ञानेन विरोध इत्याशङ्क्य तन्निराकरणाय पूर्ब्बाधिकरणन्यायातिदेशः क्रियते । इतरस्यापि पुण्यस्य कर्मण एवमघवदसंश्लेषो विनाशश्च ज्ञानवतो भवतः । कुतः? तस्यापि स्वफलहेतुत्वे ज्ञानफलप्रतिबन्धित्वप्रसङ्गात् "उभे उ हैवैष एतेन तरतीत्यादि" श्रुतिषु च दुष्कृतवत् सुकृतस्यापि प्रणाशव्यपदेशात् अकर्त्रात्मबोधनिमित्तस्य कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् । "क्षीयन्ते चास्य कर्म्माणि इति चाऽविशेषश्रुतेः । यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यं ज्ञानापेक्षयानिकृष्टफलत्वात् । अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः 'नैनं सेतुमहोरात्रे प्रतते तरत" इत्यत्र सह दुष्कृतेन सुकृतमप्यनुक्रम्य 'सर्वे पाप्मानोऽतो निवर्त्तन्त" इत्यविशेषेणैव प्रकृतेषु पाप्मशब्दप्रयोगात् । पाते त्विति । तुशब्दोऽवधारणार्थः । एवं धर्म्माधर्म्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यं भाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति

"अनारब्धकार्य्ये एव तु पूर्वे तदवधेः" शा० सू० ॥ "पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः स किमविशेषेणारब्धकार्य्ययोश्च भवत्युत विशेषेणानारब्धकार्य्ययोरेवेति विचार्यते तत्र" "उभे उ हैवैष एतेन तरतीत्येवमादि" श्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह अनारब्धकार्य्ये एव त्विति । अप्रवृत्तफले एव पूर्वजन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राक् च ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते न त्वारब्धकार्य्ये सामिभुक्तफले, याभ्यामेतद्ब्रह्मज्ञानायतनं जन्म निर्म्मितम् । कुत एतत् ? "तस्य तावदेव चिरं यावन्न विमोक्ष्य इति शरीरपातावधिकरणात् क्षेमप्राप्तेः । इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत । ननु वस्तुबलेनैवायमकर्त्रात्मबोधः कर्म्माणि क्षपयन् कथं कानिचित् क्षपयेत् कानिचिच्चोपेक्षेत न हि समाने ह्यग्निबीजसम्पर्के केषाञ्चिद्बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्त्तुमिति । उच्यते । न तावदनाश्रित्यारब्धकार्यकर्म्माशयं ज्ञानोत्पत्तिरुपपद्यते आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम् । अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति । बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात्